**Series SKS/C**

कोड नं. **22**

**Code No.**

रोल नं.
Roll No.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।

Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **15** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (केन्द्रिकम्)

# SANSKRIT (Core)

*समय : होरात्रयम्* *पूर्णाङ्काः : 100*

*Time allowed : 3 hours* *Maximum Marks : 100*

*निर्देशाः :*

*सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*

*जहाँ स्पष्ट संकेत नहीं हैं, वहाँ उत्तर संस्कृत में ही दीजिए ।*

*Answer the questions in Sanskrit only, unless stated otherwise.*

*उत्तराणि, पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि ।*

*सभी उत्तर, अलग दी गई उत्तर-पुस्तिका में लिखें ।*

*Answers should be written only, in the separate answer-book provided.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | 10 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मककार्यम् (संस्कृत रचनात्मक कार्य) | 15 अङ्काः |
| SECTION B | (Sanskrit Writing Skills) | |
| खण्डः ग | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | 30 अङ्काः |
| SECTION C | (Applied Grammar) | |
| खण्डः घ | भाग I — पठितांश – अवबोधनम् (पठितांश – अवबोधन) | 35 अङ्काः |
| SECTION D | PART I — Reading Comprehension | |
| | भाग II — सामान्यः संस्कृतसाहित्यपरिचयः (सामान्य संस्कृत साहित्य-परिचय) | 10 अङ्काः |
| | PART II — General Introduction to Sanskrit Literature | |

## खण्डः क (SECTION A)
## अपठितांश – अवबोधनम्
## अपठितांश – अवबोधन
## Unseen Reading Comprehension *10*

1. अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :
निम्नलिखित गद्यांश को पढ़कर प्रदत्त प्रश्नों का संस्कृत में उत्तर दीजिए :
Read the following passage and answer the given questions in Sanskrit :

अस्मिन् जगति सर्वं खलु सकारणं भवति । कार्यं भवति कारणस्य परिणामः कारणस्य परिणामः च कार्यं भवति । एकं कार्यम् अन्यस्य कारणं भवति । इदं ज्ञात्वा अस्य स्रोतांसि वा ज्ञात्वा न कोपि भवति ज्ञानवान् । वेदेष्वपि वर्ण्यते । "अहम् खलु न अज्ञः नैव च सर्वज्ञः । यः खलु जानाति यत् परमं ब्रह्म ज्ञाताद् अज्ञाताद् वा भिन्नं स एव सर्वज्ञः ।" ब्रह्मणः ज्ञानं मस्तिष्कस्य विशिष्टैव अवस्था । स खलु जीवस्य देश-काल-व्यक्तस्य ज्ञानात्मक-शक्तेः परः । तज्ज्ञानस्य स्रोतः बाह्या भौतिकता नास्ति परम् आन्तरिकी आध्यात्मिकता अस्ति । अतः यस्य ज्ञानस्य अन्तिमो बिन्दुः आध्यात्मिकज्ञानं तदेव सत्यं ज्ञानं भवति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक पद में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 4=2$

(i) कः सर्वज्ञोऽज्ञो वा न ?
(ii) ज्ञानस्य अन्तिमो बिन्दुः किम् ?
(iii) मस्तिष्कस्य विशिष्टा अवस्था कस्य ज्ञानम् ?
(iv) संसारे सर्वं कीदृशम् अस्ति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. $1 \times 2=2$

(i) कार्यं कारणं वा कस्य परिणामः भवति ?
(ii) सर्वज्ञः कः भवति ?

(स) यथानिर्देशम् उत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed. *1×4=4*

(i) 'भौतिकता' अस्याः विशेषणं किम् ?

(ii) 'प्रथमः' अस्य विलोमपदं किम् ?

(iii) 'स खलु जीवस्य .... परः ।' अत्र 'स' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(iv) 'मूलानि' अस्य कः पर्यायः अत्र प्रयुक्तः ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए संस्कृत में उपयुक्त शीर्षक लिखिए ।
Write a suitable title for this passage in Sanskrit. *2*

## खण्डः ख (SECTION B)
## संस्कृतेन रचनात्मककार्यम्
## संस्कृत रचनात्मक कार्य
## Sanskrit Writing Skills *15*

**2.** भवान् नागेन्द्रः । दिल्लीनगरे पुस्तकप्रदर्शिन्यां भागं ग्रहीतुं स्वकीयं मित्रं महेन्द्रम् आकारयितुं लिखिते पत्रे रिक्तस्थानानि मञ्जूषापदसहायतया पूरयित्वा पत्रं पुनः लिखतु ।
आप नागेन्द्र हैं । दिल्ली नगर में पुस्तक-प्रदर्शिनी देखने के लिए अपने मित्र महेन्द्र को बुलाने के लिए लिखे गए पत्र में मञ्जूषा के पदों की सहायता से रिक्त स्थानों की पूर्ति कर पत्र को पुनः लिखिए ।
You are Nagendra. In a letter written to your friend Mahendra, to call him to see the Book Exhibition in Delhi, fill in the blanks with the help of the words given in the box below and rewrite the same. $\frac{1}{2} \times 10 = 5$

**पत्रम्**

केन्द्रियविद्यालयः,
नई दिल्लीतः ।
दिनांकः ................

प्रियमित्र ! (i) ________________

शुभं कामये । समाचारपत्रमाध्यमेन (ii) __________ जानात्येव यद् दिल्लीनगरे (iii) __________ सप्ताहपर्यन्तं पुस्तकप्रदर्शिन्या (iv) __________ भविष्यति ।

तस्यां संस्कृतभाषायां (v) __________ नूतनलेखकानां बहूनि पुस्तकानि (vi) __________ प्रदर्शयिष्यन्ते । मम (vii) __________ अभिलाषः यद् भवान् मया सह (viii) __________ आनन्दं प्राप्नोतु तत्र च प्रदर्शितानां (ix) __________ अपि दर्शनं करोतु ।

पितृभ्यां (x) __________ । भगिन्यै च आशिषः ।

भवतः सुहृत्,

नागेन्द्रः ।

**मञ्जूषा**

| |
|---|
| अपि, आयोजनम्, नाटकानाम्, प्रदर्शिन्याम्, नमः, लिखितानि, महेन्द्र !, अयम्, अद्यत्वे, भवान् । |

**3.** अधः प्रदत्तायां लघुकथायां मञ्जूषापदसहायतया रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत :
नीचे दी गई लघुकथा में मञ्जूषा के पदों की सहायता से रिक्त स्थानों की पूर्ति कर कथा को पुनः लिखिए :
Complete the blanks of the short story given below with the help of the words given in the box below and rewrite the same : $\frac{1}{2} \times 10=5$

एको भिक्षुः प्रतिगृहं भिक्षां (i) __________ । यत्किमपि (ii) __________ स सर्वेभ्यः आशिषम् अयच्छत् । प्रायशः गृहिणः तस्मै (iii) __________ प्रदाय प्रासीदन् । आसीद् एको धनिकः, तस्मै न कदापि किमपि दत्तवान् । परं भिक्षुकः (iv) __________ तद्गृहमगच्छत् । एकदा गृहस्वामिनी सुस्पष्टमुवाच – 'न त्वं किमपि प्राप्स्यसि गृहादस्मात्' । परं भिक्षुकस्तु नियमं न (v) __________ । सर्वे गृहसदस्याः अभवन् (vi) __________ तं तथागच्छन्तं दृष्ट्वा । एकदा कुटुम्बी अवदत् – 'यदा त्वं जानासि, अत्र न दास्यते किमपि तुभ्यं तर्हि कथं याचते (vii) __________ । भिक्षुः सप्रसादमब्रवीत् – 'धन्योऽहमीदृशं भवत्स्नेहं लब्ध्वा ।' भवान् तु मह्यं (viii) __________ अवसरं प्रायच्छत् । अहं सहनशीलो जातः । मम (ix) __________ समाप्तिं गतः । भवद्गृहं संजातं मह्यमाश्रमः । धनिकस्तु श्रुत्वा तत् तथा लज्जितो यत् (x) __________ क्षमामयाचत् ।

**मञ्जूषा**

| |
|---|
| तम्, अयाचत्, चकिताः, प्राप्य, भिक्षां, त्यक्तवान्, अहङ्कारः, भवान्, नियमतः, साधनायाः |

4. मञ्जूषाप्रदत्तपदसहायतया **पञ्च**-संस्कृतवाक्येषु 'शिक्षाया महत्त्वम्' इति विषयमधिकृत्य वर्णनं कुरुत ।

मञ्जूषा में दिए गए पदों की सहायता से 'शिक्षाया महत्त्वम्' इस विषय का वर्णन **पाँच** संस्कृत वाक्यों में कीजिए ।

With the help of the words given in the box below describe **'शिक्षाया महत्त्वम्'** (Importance of learning) in Sanskrit in **five** sentences. *1×5=5*

**मञ्जूषा**

| |
|---|
| धनम्, सुखं, शान्तिः, सम्मानम्, लभ्यते, प्राप्नोति, कुर्वन्ति, आत्मतोषम्, जगति, प्रजासु, समाजे, सात्त्विकी, ऋषि-ऋणम्, समाप्तिम्, जायते, मनः । |

**खण्डः ग (SECTION C)**

**अनुप्रयुक्तव्याकरणम्**

**अनुप्रयुक्त व्याकरण**

**Applied Grammar** *30*

5. अधोलिखितवाक्येषु रेखांकितपदानां सन्धिच्छेदं कुरुत :

निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि-विच्छेद कीजिए :

Disjoin Sandhis in the underlined words of the following sentences : *1×6=6*

(i) येनाक्रमन्त्यृषयः ।

(ii) सदानुकूलेषु हि कुर्वते रतिम् ।

(iii) स प्रदेशः अत्रैव अस्ति ।

(iv) इनश्च दिनस्य ।

(v) आर्यस्य निष्प्रयोजना प्रवृत्तिः ।

(vi) निघर्षणच्छेदनतापताडनैः ।

**6.** अधोलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहा लेखनीयाः :

निम्नलिखित वाक्यों में रेखाङ्कित समस्त पदों के विग्रह लिखिए :

Expound the underlined words of the following sentences : *1×6=6*

(i) यः संश्रृणुते स किंप्रभुः ।

(ii) भो भो प्रासादाधिकृताः पुरुषाः ।

(iii) कुलिशपातोपमं वचः ।

(iv) नीलाकाशः छत्रवत् प्रतीयते ।

(v) उपत्यकाभूमिषु हिमराशिः निपतति ।

(vi) सत्येन पन्था विततो देवयानः ।

**7.** अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गप्रकृति-प्रत्ययान् योजयित्वा रिक्तस्थानानि पूरयत :

निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़कर रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks in the following sentences by adding suffixes to the roots and words given in the brackets : *1×8=8*

(i) कुसुमपुरम् (अव + लोक + तुमुन्) ____________ इच्छामि ।

(ii) साधोः शीलं सर्वत्र (वन्द् + अनीयर्) ____________ भवति ।

(iii) नाहं (दा + क्त) ____________ सम्पत्तिं पुनः आददामि ।

(iv) अहं गृहं (प्र + विश् + क्त्वा) ____________ जानामि ।

(v) भगवतो (मरीचिमाला + इन्) ____________ ।

(vi) (पिशुन + तल्) ____________ मानवस्य दौर्बल्यम् ।

(vii) (धर्मवृत् + क्तिन्) ____________ नृपाय अनिवार्या ।

(viii) (आश्रि + तव्यत्) ____________ अथवा दुर्गः ।

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिं कुरुत :

निम्नलिखित वाक्यों में कर्ता एवं क्रियापदों की अन्विति कीजिए :

Write the suitable verb according to the subject in the following sentences : *1× 5=5*

(i) एषा गोष्ठी समाप्तिं याति/यान्ति ।

(ii) भवान्/भवन्तः क्षणमात्रं प्रतिपालयतु ।

(iii) मैत्रेयः इत एव आगच्छति/आगच्छतः ।

(iv) सखे ! वयम्/अहम् किमर्थं सन्तापं करिष्ये ?

(v) नीलवर्णा भूमिः धूसरवर्णा जायन्ते/जायते ।

**अथवा (OR)**

अधोलिखितेषु वाक्येषु विशेष्यैः सह मञ्जूषायाः विशेषणपदानि योजयत :

निम्नलिखित वाक्यों में विशेष्यों के साथ मञ्जूषा से विशेषण पदों को जोड़िए :

Add the suitable adjectives from the box with their qualifying nouns in the following sentences : *1× 5=5*

(i) __________ भोजनानां दात्री भव ।

(ii) समिद्भिः __________ छदिप्रान्तः ।

(iii) __________ अशितव्यं भविष्यति ।

(iv) __________ अयं ह्रदः अस्माभिः न अन्वेषितः ।

(v) मृगेषु __________ शराः न प्रयोक्तव्याः ।

**मञ्जूषा**

| सम्पन्नम्, निशिताः, अतिनमितः, बहुमत्स्यः, शोभमानानाम् । |
|---|

9. अधोलिखितेषु वाक्येषु कोष्ठप्रदत्तपदैः सह उपयुक्तां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत :

निम्नलिखित वाक्यों में कोष्ठक में दिए गए शब्दों से उपयुक्त विभक्ति का प्रयोग कर रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks using appropriate case-endings (विभक्ति) with the words given in brackets in the following sentences : *1× 5=5*

(i) __________ विना औषधीनाम् अस्तित्वं समाप्तं भविष्यति । (सूर्य)

(ii) अये __________ अध्यास्ते वृषलः । (सिंहासन)

(iii) कथं स्पर्धते __________ सह दुरात्मा राक्षसः ? (अस्मद्)

(iv) जीवने __________ न कुपितव्यम् । (पितृ)

(v) __________ समम् भुक्त्वा गच्छामि । (पारावत)

## खण्डः घ (SECTION D)

### भाग I

### (PART I)

### पठितांश – अवबोधनम्

### पठितांश – अवबोधन

### Reading Comprehension

35

10. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत :
निम्नलिखित गद्यांश, पद्य तथा नाट्यांश को पढ़कर उन पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :
Read the following prose, poetry and drama passages and answer the questions based on them in Sanskrit :

(क) **गद्यांशः**

अथ तत्समाकर्ण्य उच्चैः विहस्य यद् भविष्यः उवाच – अहो ! भवद्भ्यां न सम्यग् मन्त्रितम् इति । किं वाङ्मात्रेणापि पितृपैतामहिकम् एतत्सरः त्यक्तुं युज्यते? आयुःक्षयोऽस्ति चेत्, अन्यत्र गतानामपि मृत्युः भविष्यति एव ।

**प्रश्नाः**

(अ) एकपदेनोत्तरत ।
एक पद में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2=1$
(i) सरः कीदृक् अस्ति ?
(ii) कुत्र गतानां मृत्युः भविष्यति ?

(ब) पूर्णवाक्येनोत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. 1
सरः कीदृशम्, कथं च त्यक्तुं युज्यते ?

(स) यथानिर्देशमुत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed.
(i) 'जीवनम्' अस्य विलोमपदं किम् ? $\frac{1}{2}$
(ii) 'उचितम्' अस्य कः पर्यायः ? $\frac{1}{2}$
(iii) 'यद् भविष्यः' अस्य क्रियापदं किम् ? 1
(iv) 'पितृपैतामहिकम्' अस्य किं विशेष्यम् ? 1

(ख) **पद्यम्**

व्रजन्ति ते मूढधियः पराभवं,
भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधान्
असंवृताङ्गान्निशिता इवेषवः ।।

**प्रश्नाः**

(अ) एकपदेनोत्तरत ।
एक पद में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2=1$
(i) के पराभवं व्रजन्ति ?
(ii) के प्रविश्य घ्नन्ति ?

(ब) पूर्णवाक्येनोत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *1*
ये जनाः छलिषु छलं कुर्वन्ति ते कीदृशाः भवन्ति ?

(स) यथानिर्देशमुत्तरत ।
निर्देशानुसार उत्तर दीजिए ।
Answer as directed.
(i) 'सम्मानम्' अस्य विलोमपदं किम् ?
(ii) 'शराः' अस्य पर्यायः कः ?
(iii) 'मूढधियः' अस्य क्रियापदं किम् ?
(iv) 'इषवः' अस्य विशेषणं किम् ?

(ग) **नाट्यांशः**

*सचिवः* भगवतः आर्यभटस्य महिमानं वयं जानीमः । 'पाई' इत्यस्य मूल्यं तेनैव सर्वप्रथमं स्पष्टीकृतम् । इदानीं नागार्जुनः कौटिल्यरचिताद् अर्थशास्त्राद् रसायनशास्त्रम् अधिकृत्य अस्माकं ज्ञानवृद्धिं करिष्यति ।

*नागार्जुनः* सर्वेभ्यः नमो नमः । कौटिल्यस्य अर्थशास्त्रं तु अद्भुतः ग्रन्थः, यत्र बहवः विषयाः वर्णिताः । अहं केवलं रसायनविषये किञ्चिद् वक्ष्यामि । कौटिल्यः कथयति – "अशुद्धं स्वर्णं चतुर्गुणेन सीसेन शोधयेत् ।"

प्रश्नाः

(अ) एकपदेनोत्तरत ।

एक पद में उत्तर दीजिए ।

Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) वयं कस्य महिमानं जानीमः ?

(ii) नागार्जुनः किम् अधिकृत्य ज्ञानवृद्धिं करिष्यति ?

(ब) पूर्णवाक्येनोत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. *1*

अद्‌भुतग्रन्थे कौटिल्यशास्त्रे के वर्णिताः ?

(स) यथानिर्देशमुत्तरत ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) 'विचित्रः' अस्य कः पर्यायः ? $\frac{1}{2}$

(ii) 'अल्पाः' अस्य विलोमपदं किम् ? $\frac{1}{2}$

(iii) 'वयम्' अस्य क्रियापदं किम् ? *1*

(iv) 'स्वर्णम्' अस्य विशेषणपदं किम् ? *1*

**11.** यथानिर्देशं प्रश्नौ उत्तरत ।

निर्देशानुसार दोनों प्रश्नों के उत्तर दीजिए ।

Answer both the questions as directed. *2+2=4*

(i) 'दारिद्र्ये दुर्लभं सत्त्वम्' अस्मिन् पाठे कस्य महत्त्वं वर्णितम् ?

(ii) 'मानवः स्वभावादेव उत्सवप्रियः' इति वाक्यं का कं कथयति ?

**12.** प्रत्येकम् अंशस्य प्रदत्त-भावार्थ-**त्रयात्** शुद्धं भावार्थं चित्वा लिखत ।

प्रत्येक अंश के लिए दिए गए **तीन** भावार्थों में से शुद्ध भावार्थ का चयन करके लिखिए ।

Pick out and write the correct one out of the **three** explanations given each of the following lines. *2+2=4*

(अ) सुरक्षितं दैवहतं विनश्यति ।

भावार्थाः

(i) सुरक्षितः जनः विधिना हतम् अपि रक्षति ।

(ii) यस्य जीवनं न स सुरक्षितः अपि नश्यति ।

(iii) यस्य जीवनं न तस्य रक्षा तु करणीया एव ।

(ब) सत्त्वं च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम् ।

भावार्थाः

(i) दारिद्र्ये मनुष्यः भ्रश्यति ।

(ii) दारिद्र्ये यस्य जनस्य मनः न भ्रश्यति स दुर्लभः ।

(iii) दरिद्रेषु कोऽपि मानवः भ्रष्टो न भवति ।

**अथवा (OR)**

अधोलिखितपद्यस्य प्रदत्तं भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत :

निम्नलिखित पद्य के दिए गए भावार्थ को मञ्जूषा में दिए गए पदों से पूर्ण कर पुनः लिखिए :

Complete the central idea of the given verse with the words given in the box below and re-write the same : *1×4=4*

निर्वैरा विमुखीभवन्ति सुहृदः स्फीतीभवन्त्यापदः ।
पापं कर्म च यत् परैरपि कृतं तत्तस्य सम्भाव्यते ।।

भावार्थः

(दारिद्र्ये सम्प्राप्ते) प्रियतमाः (i) __________ अपि न भाषन्ते । सर्वतः (ii) __________ एव परिगच्छन्ति । (iii) __________ काले इतरैः अप्रियैः जनैः विहितमपि पापं (iv) __________ एव प्रदर्श्यते ।

**मञ्जूषा**

| विपदः, तस्य, सखायः, अस्मिन् । |
|---|

**13.** अधः प्रदत्तस्य श्लोकद्वयस्य प्रदत्तान्वये मञ्जूषातः पदैः रिक्तस्थानपूर्तिं कृत्वा अन्वयं पुनः लिखत :

निम्नलिखित **दो** श्लोकों के दिए गए अन्वयों में मञ्जूषा के पदों से रिक्तस्थानों की पूर्ति कर अन्वय को पुनः लिखिए :

The prose-order-renderings of the following **two** verses have been given below. Fill in the blanks by the words given in the box and re-write the same : $\frac{1}{2} \times 8 = 4$

(अ) **पद्यांशः**

स किंसखा साधु न शास्ति योऽधिपं,
हितान्न यः संशृणुते स किंप्रभुः ।
सदाऽनुकूलेषु हि कुर्वते रतिं,
नृपेष्वमात्येषु च सर्वसम्पदः ।।

अन्वयः

यः अधिपम् (i) __________ न शास्ति स किंसखा, यः हितान् न संशृणुते स (ii) __________ । नृपेषु अमात्येषु च (iii) __________ हि (iv) __________ सदा रतिं कुर्वते ।

(ब) **पद्यांशः**

अशक्तैर्बलिनः शत्रोः कर्त्तव्यं प्रपलायनम् ।
आश्रितव्योऽथवा दुर्गः नान्या तेषां गतिर्भवेत् ।।

अन्वयः

अशक्तैः बलिनः शत्रोः (i) __________ कर्त्तव्यम्, (ii) __________ दुर्गः आश्रितव्यः । (iii) __________ अन्या (iv) __________ न भवेत् ।

**मञ्जूषा**

| अथवा, किंप्रभुः, प्रपलायनम्, साधु, गतिः, अनुकूलेषु, तेषाम्, सर्वसम्पदः । |
|---|

**14.** अधोलिखितानां 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह सार्थकसंयोजनं कृत्वा वाक्यानि पुनः लिखत :
निम्नलिखित 'क' स्तम्भ के वाक्यांशों का 'ख' स्तम्भ के वाक्यांशों के साथ सार्थक संयोजन कर वाक्यों को पुनः लिखिए :
Match the sentences of column 'क' with the suitable sentences of column 'ख' and re-write the same : *1×4=4*

| | 'क' | | 'ख' |
|---|---|---|---|
| (i) | सौजन्यं यदि | (अ) | राजा तृणवद् गण्यते । |
| (ii) | निःस्पृहत्यागिभिः जनैः | (ब) | आत्मन्येवानुपश्यति । |
| (iii) | यस्तु सर्वाणि भूतानि | (स) | आहूयन्ते अधिकारिणः । |
| (iv) | न निष्प्रयोजनम् प्रभुभिः | (द) | किं गुणैः ? |

**15.** अधोलिखितेषु वाक्येषु रेखांकित-शब्दानां प्रसङ्गानुसारम् सार्थकम् अर्थं चित्वा लिखत :
निम्नलिखित वाक्यों में रेखांकित शब्दों के प्रसङ्गानुसार सार्थक अर्थ चुनकर लिखिए :
Select and write the appropriate meanings of the underlined words according to the context : *1×4=4*

(अ) कुण्डलम् <u>आखण्डल</u>दिशः ।

(i) श्यामः
(ii) विष्णुः
(iii) इन्द्रः ।

(ब) <u>शुचि</u> मनो यद्यस्ति ।

(i) पवित्रम्

(ii) अनृतम्

(iii) कृष्णम् ।

(स) <u>गेहे</u>ऽहोरात्रम् ।

(i) काले

(ii) सदने

(iii) दुर्गे ।

(द) <u>घ्नन्ति</u> शठाः ।

(i) मारयन्ति

(ii) पालयन्ति

(iii) कारयन्ति ।

## खण्डः घ (SECTION D)

## भाग II

## (PART II)

### सामान्यः संस्कृतसाहित्यपरिचयः

### सामान्य संस्कृत साहित्य-परिचय

### General Introduction to Sanskrit Literature 10

16. (अ) अधोलिखितेषु कस्यापि ***एक***स्य कवेः परिचयः संस्कृतेन लेख्यः :

निम्नलिखित में से किसी ***एक*** कवि का संक्षिप्त परिचय संस्कृत में लिखिए :

Write a brief note on any ***one*** poet of the following in Sanskrit : 5

भासः, वराहमिहिरः, भर्तृहरिः ।

**अथवा (OR)**

अधोलिखितवाक्येषु मञ्जूषादत्तपदैः रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत :
निम्नलिखित वाक्यों में मञ्जूषा में दिए गए पदों से रिक्त स्थानों की पूर्ति कर पुनः लिखिए :

Fill in the blanks in the following sentences from the words given in the box and re-write the same : $\frac{1}{2} \times 10=5$

(i) नाटकेषु सर्वश्राव्यं __________ कथ्यते ।

(ii) कथायाः सूचना __________ दीयते ।

(iii) खण्डकाव्यं __________ भेदः अस्ति ।

(iv) नाटकं __________ प्रारब्धं भवति ।

(v) गद्यं __________ भवति ।

(vi) चम्पूकाव्ये गद्यं __________ च भवति ।

(vii) गद्यकाव्ये __________ अपि एकः भेदः ।

(viii) प्रकरणे __________ अङ्काः भवन्ति ।

(ix) नीतिशतकं __________ भवति ।

(x) शृङ्गाररसः __________ प्रधानः भवति ।

**मञ्जूषा**

| |
|---|
| मुक्तककाव्यम्, काव्यस्य, नान्द्या, आख्यायिका, सूत्रधारेण, प्रकाशम्, छन्दोरहितम्, रसेषु, दश, पद्यम् । |

(ब) गद्यकाव्यस्य का अपि **पञ्च** विशेषताः संस्कृतेन लिखत ।
गद्य काव्य की किन्हीं **पाँच** विशेषताओं को संस्कृत में लिखिए ।
Write any **five** characteristics of prose literature in Sanskrit. 5